No. ६२५ - घ

Title गोदानविधिः

Author

Extent ४ Age

Subject धर्मशास्त्रम् · सम्पूर्णम्

नं० ६२५-घ

गोदान पद्धति विधिः (धर्मशास्त्रम्)

नं० ६२५-घ

४ पत्र

पत्राणि ४ (चत्वारि) (सम्पूर्णम्)

नं० ६२५-घ (धर्मशास्त्रम्)
(धर्मशास्त्रम्) गोदानविधिः ((सम्पूर्णम्)
पत्राणि ४ (चत्वारि)

अथसामग्रीगोदानस्य॥

केसर	उपर्णा	वस्त्रगोवास्ते
मोली	स्वर्णालंकार	तांबूल
आम	घंटार	रोली
गुड	स्वर्णश्रृंग	इतिसामग्री॥
पतासे	रौप्यकेखुर	
पुष्प	पृष्ठताम्रकीर	
पुष्पमाला	पात्र	
पंचरंग	मोतीपुछवास्ते	
धूप	दरयाई	
दीप	यवतिलकुशा	
पूगीफल	आसन	
धोती		

गोदानपद्धतिः ४

गो॰प॰ १

॥श्रीगणेशाय नमः॥ अथ गोदानविधिरुच्यते॥ अथ यजमानः सुस्नातः सुप्रक्षालितपाणिपादः स्वाचांतो मृज्ञोमयोपलिप्ता-
यां दानभूमौ स्वासने समुपविश्य करौ सपवित्रोपग्रहौ कृत्वाचम्य प्राणायामत्रयं कृत्वा देवान्गुरून्नमस्कृत्य संकल्पं कुर्या-
त्। स यथा। ओमद्य श्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामः श्रीयज्ञपुरुषप्रीतये गोदानमहं करिष्ये। तदंगत्वेन गणेश^
द्विजजनं चाहं करिष्ये। स्वस्य दक्षिणत उदङ्मुखं ब्राह्मणमासने उपवेश्य। ओं गवे नमः। इति त्रिः संपूज्य। ओं ब्राह्मणाय नम इति
त्रिः संपूज्य। ओं गां ददानीति द्विजकरे जलदानं। ददस्वेति ब्राह्मणो वदेत्। ततो गंधपुष्पतांबूलाक्षतपूगीफलहेमालंकारवासां-
सि हस्ते गृहीत्वा ओमद्यामुकगोत्रममुकशर्माणं ब्राह्मणमेभिर्गंधपुष्पाक्षतवासस्तांबूलहेमालंकारफलादिभिर्गोदाना-
र्थं त्वामहं वृणे। ओं वृतोस्मीति प्रतिवचनं। यदर्च्चनं कृतं विप्र तव विष्णुस्वरूपिणः। तत्सर्वं मम दानं च विघ्नवेत्वं समर्प्पय एवं सं-
प्रार्थ्य स्वपुरतः प्राङ्मुखीं गां संस्थाप्य वत्समुत्तरतो न्यसेत्। अथ गोपूजाक्रमः। सर्वदेवप्रियं देवि चंदनं मलयोद्भवं। कस्तू-
रीकुंकुमाढ्यं च गो गंधः प्रतिगृह्यतां। इति गंधमंत्रः। अथ पुष्पमंत्रः। या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता। धेनुरू-
पेण सा देवी मम पापं व्यपोहतु। ग्रासाय नमः। हस्ते पुष्पाणि गृहीत्वा। विष्णोर्वक्षसि या लक्ष्मीः स्वाहा चैव विभावसोः। चंद्रार्क-
शक्रशक्तिर्या धेनुरूपास्तु सा स्थिता। श्रृंगाभ्यां नमः। पुनः पुष्पाणि गृहीत्वा। चतुर्मुखस्य या लक्ष्मी या लक्ष्मीर्धनदस्य च। लक्ष्मी

यीलोकपालानां साधेनुर्वरदास्तु मे। दक्षिणायनमः। पुनः पुष्पाणि गृहीत्वा। स्वधा त्वं पितृमुख्यानां स्वाहाऊत्तभुजां तथा
। सर्वपापहरा धेनुस्तस्माच्छांतिं प्रयच्छ मे। पुनः पुष्पाणि गृहीत्वा। दहत्यघं च रुद्राणी शंकरस्य सदा प्रिया। धेनुरूपे-
ण सा देवी मम पापं व्यपोहतु। पूर्वपद्यां नमः। पुनः पुष्पाणि गृहीत्वा। नमो वो विश्वमूर्त्तिभ्यो लोकमातृभ्य एव च। लोका-
धिवासिनीभ्यश्च रोहिणीभ्यो नमो नमः। पश्चिमपद्यां नमः। वनस्पत्युद्भवो धूपो गंधाढ्यो गंध उत्तमः। आघ्रेयः सर्वदेवानां
धूपोऽयं प्रतिगृह्यतां। धूपः। आज्यं च वर्त्तिसंयुक्तं पात्रेऽस्मिंश्च कृतं मया। दीपं गृहाण सुरभे मया दत्तं हि भक्तितः। दीपः। अथ नैवे-
द्यं। वैष्णवी सुरभी माता नाम्नि त्वं विष्णुपदे स्थिता। नैवेद्यं हि मया दत्तं सुरभे प्रतिगृह्यतां। आच्छादनं। आच्छादनं च कौशेयं शु-
द्धं चैव सुनिर्मलं। सुरभे दीयमानं तत्प्रीयतां केशवः सदा। अथ घंटाचामरमंत्रः। यत्ते मयार्पितं शुद्धं घंटाचामरमंडितं। गृ-
वेयं च गृहाणेदं मुनित्रिदशवंदिते। अथावाहनं। आवाहयाम्यहं देवीं सुरभीं लोकमातरं। पूज्यां त्रिभुवने देवैर्गंधर्वैः
किन्नरैः सदा। अमृतं स्रवणे देवि सर्वधर्मप्रवर्त्तिनि। तारयस्व महादेवि दुःसहाद्दुःखसागरात्। अग्नये त्वा मह्यं वरुणो
ददातु सोऽमृतत्वमशीयायुर्दात्र एधि मयो मह्यं प्रतिगृहीत्रे रुपत्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीय त्वं प्राणो दात्र
एधि मयो मह्यं प्रतिगृहीत्रे बृहस्पतये त्वा मह्यं वरुणो ददातु सोऽमृतत्वमशीय त्वगदात्र एधि मयो मह्यं प्रतिगृहीत्रे यमा

यत्वामह्यंवरुणोददातुसोमृतत्वमशीय॥इरावतीतिमंत्रेणधेनोःकुर्यात्प्रदक्षिणां।ॐइरावतीधेनुमतीहिभूतंसूयवसि
नीमनवेदशस्या।व्यस्कभ्नारोदसीविष्णवेतेदाधर्थपृथिवीमभितोमयूखैःस्वाहाइतिआवाहनं।अथन्यासः।इंद्रोयस्या
स्तुशृंगाग्रेवसतेचैवनित्यशः।उरःस्कंदःशिरोब्रह्माललाटेगरुडध्वजः।कर्णयोरश्विनौदेवौचक्षुषोःशशिभास्करौ।दं
तेषुमरुतोदेवाजिह्वायांचसरस्वती।अपानेसर्वतीर्थानिपरिस्रावेचजाह्नवी।भगवांश्चैववरुणोदक्षिणंकुक्षिमाश्रि
तः।वामपार्श्वेस्थितायक्षास्तेजोवंतोमहाबलाः।खुरमध्येतुगंधर्वाःखुराग्रेषुचपन्नगाः।खुराणांपश्चिमेभागेस्मृतोश्चार
सरसांगणाः।गोमयेवसतेलक्ष्मीःपवित्रेलोकमंगलं।ॐकारेचतुरोवेदारंभाशष्टेप्रजापतिः।चत्वारःसागराःपूर्णगवां
चैवपयोधराः।अमृतेस्रवतेनित्यंपिबंतिसुरमानवाः।धेनुपुच्छंकरेग्रह्यसकुशंतिलसंयुतं।सव्यापसव्यविधिनात
र्प्पयेत्पितृदेवताः।अथतर्पणं।गणेशश्चतथाब्रह्माकेशवोरुद्रदेवता।लक्ष्मीःसरस्वतीचैवयेचान्येचनवग्रहाः।तेसर्वेतृप्तिमायां
तुगोपुच्छोदकतर्प्पणे।देवाधिदेवताःसर्वास्तथाप्रत्यधिदेवताः।नक्षत्रवसुरुद्राश्चविश्वेदेवामरुद्गणाः।तेसर्वेतृप्तिमायांतु
गोपुच्छोदकतर्पणे।किन्नराश्चपिशाचाश्चयक्षगंधर्वराक्षसाः।दैत्याश्चदानवाश्चैवयेचान्येऽप्सरसांगणाः।तेसर्वे०।३।पुलस्त्यः २
पुलहश्चैवदत्तात्रेयोथभार्गवः।वशिष्ठोंगिराश्चैवकश्यपश्चैवकाश्यपः।तेसर्वे०।४।ऋषयोमानवादेवाअधःस्थाभूमिदेवताः

।वाय्वाधारा जलाधारा निराधारास्तथैव च। ते सर्वे०।५। सरितः सागराश्चैव पर्वताश्च वनानि च। सर्वौषधयश्चैव मृगाश्चा
3 रण्यवासिनः। ते सर्वे०।६। स्वाहा स्वधा तथा लक्ष्मीर्वृद्धिः श्रद्धा सरस्वती। मेधा प्रीतिस्तथा लज्जा कीर्त्तिश्च दशमी तथा। ते सर्वे०
।७। ब्रह्माद्या देवताः सर्वे त्रयस्त्रिंशत्तु कोटयः। गायत्री चैव सावित्री देवपत्न्योऽथ मातरः। ते सर्वे०।८। विष्ण्वाद्याश्चैव ये देवा ये च वै
कुंठवासिनः। गरुडासनमारूढा आगताः पुच्छगोचरे। ते सर्वे०। रुद्राद्या देवताः सर्वे ये च कैलाशवासिनः। वृषभासनमारू
ढा योगिनः पीठसंस्थिताः। ते सर्वे०।१०। ततः कंठीकृला। सनकः सनंदनश्चैव तृतीयश्च सनातनः। कपिलश्चासुरिश्चैव वोढुः पं
चशिखस्तथा। ते सर्वे०।११। अपसव्यं। कव्यवाडोनलः सोमो यमोऽर्यमा तथैव च। अग्निष्वात्ताः पितृगणा बर्हिषदः सोमपास्त
था। ते सर्वे०।१२। पिता पितामहश्चैव तथैव प्रपितामहः। मातामहश्च मातामह वृद्धप्रमातामहस्तथा।१३। ते सर्वे०। माता पितामही
चैव तथैवान्याश्च गोत्रजाः। ते सर्वे०।१४। पितृवंशे मृता ये च मातृवंशे तथैव च। गुरुश्वशुरबंधूनां ये चान्ये बांधवाः स्मृताः। ते स
र्वे०।१५। ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः। क्रियालोपगता ये च ये चांधाः पंगवस्तथा। ते सर्वे०।१६। विरूपा आमगर्भा ये
ज्ञाताज्ञाताः कुले मम। अन्ययोनिगता ये च ये च कीटपतंगकाः। ते सर्वे०।१७। नरके रौरवे घोरे महारौरवसंस्थिताः। असिपत्रव
ने घोरे कुंभीपाके च ये स्थिताः। ते सर्वे०।१८। विप्रहस्तैर्मृता ये च सिंहैः सर्पैश्च शृंगिभिः। चांडालेन हता ये च पथि लोपंगताश्च

येऽतेसर्वेतृ०।१९।जलमध्येमृतायेचह्यल्पमृत्युवशंगताः।वंदिमध्येमृतायेचस्त्रियोहस्तेनयेमृताः।तेसर्वें०।२०।येचब्रह्मां
डखंडेषुवसंतिपितृदेवताः।तेसर्वें०।२१।मेकेचिन्मानवालोकेआगताःपुच्छशोचरे।तेसर्वें०।२२।सव्यंकृत्वा।ब्राह्मणमं
र्घ्यादिभिःसंपूज्य।ओंमद्यामुकमासेऽमुकपक्षेऽमुकतिथौसत्लोकप्राप्तिकामइमांगांयथाशक्त्यलंकृतांस्वर्णशृंगींरौ
प्यखुरींताम्रपृष्ठींघंटाभरणभूषितांमुक्तादाममालांगूलांवस्त्राच्छादितांकांस्यपानपात्रयेत्तलदोहपात्रयुतांसवत्सांसु
शीलांरुद्रदैवतांश्रीकृष्णप्रीत्यर्थंयथानामगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे।ओंस्वस्तीतिप्रतिवचनं।ओं
अद्यतत्सत्कृतैतद्गोदानप्रतिष्ठार्थमिमंहिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददे।ओं
स्वस्तीतिप्रतिवचनं॥अथदानमंत्रः।कोदात्कस्माअदात्कामोदात्कामायादात्।कामःप्रतिग्रहीताकामैतत्ते।अथप्रार्थ कामोदाता
ना।ओंयादेवीसर्वभूतानांयाचविष्णुपदेस्थिता।धेनुरूपेणसादेवीममपापंव्यपोहतु।१।गावोमेअग्रतःसंतुगावोमेसंतुपृ
ष्ठतः।गावोमेहृदयेसंतुगवांमध्येवसाम्यहं।२।इतिधेनुतर्पणं।महादेवंनमस्कृत्यब्रह्माणंपुरुषोत्तमं।गवांस्तोत्रंप्रवक्ष्यामि
प लोकानांशांतिवर्द्धनं।नारदंपृच्छतेराजाधर्मपुत्रोयुधिष्ठिरः।गवांचदशवर्णानांकस्याःकीदृक्फलंमुने।१।नारदउवाच।श्वे ३
तारक्तातथापीतागोरीपांडुरधूम्रका।कृष्णाचकर्बुराचैवनीलाचकपिलादश।२।श्वेतांदत्वेश्वरोभूयाद्रक्ताचकुलवर्द्धि

नी।पीताधनप्रदाज्ञेयागौरीचसर्वभोगदा।धूम्राचदुर्गकांतारपापसंहारकारिणी।कालाक्षीरत्नदाज्ञेयालक्ष्मींदत्वा
नसीदति।पांडुरीदुर्ल्लभालोकेपांडुरीरूपकामदा।श्यामक्षीपुत्रकामस्यमूलंधर्मस्यनीलिका।कपिलांब्राह्मणेदत्वा
सर्वपापैःप्रमुच्यते।यच्चबाल्येकृतंपापंयौवनेचैवकृतंतथा।वाचाकृतंकर्मकृतंमनसायच्चचिंतितं।मानकूटंतुलाकूटंक
न्यानृतंगवानृतं।अगम्यागमनंचैवमित्रद्रोहकृतंचयत्।तत्सर्वंनाशयेत्पापंकपिलांयःप्रयच्छति।शतयोजनविस्ती
र्णांमहापारांमहानदीं।तारयेद्यजमानंदत्ताप्रभूतांसागरोपमां।एवंगोदक्षिणादानंविप्रेसंयोजितंतथा।पितॄंश्चतार
येन्नित्यंकुलत्रयसमुद्भवान्।यावद्वत्सस्यपादौद्वौमुखंचैवप्रदृश्यते।तावद्गौःपृथिवीज्ञेयायावद्गर्भंनमुंचति।तरु
णीरूपसंपन्नासुशीलाचपयस्विनी।न्यायार्ज्जितासवत्साचघंटाभरणभूषिता।स्वर्णशृंगीरौप्यखुरीकांस्यदोही
तथैवच।ताम्रपृष्ठासवत्साचसर्वोपस्करसंयुता।ईदृशींचैवगांदद्यात्ब्राह्मणेवेदपारगे।येतस्यांदुह्यमानायांपतं
तिभुविबिंदवः।तावत्कालंवसेत्स्वर्गेगोप्रदानान्नसंशयः।आरामायत्रसुच्छायानद्यःपायसकर्द्दमाः।शाकारयत्रसो
वर्णास्तत्रगच्छतिगोप्रदः।दशधेनुसमोनड्वानेकश्चैवधुरंधरः।समानंसदृश्यतेतेषांकुर्याद्दानमनुत्तमं।एकांचदश
गुर्दद्याद्दशदद्याच्चगोशतीं।शुभाःशतंसहस्रगुर्दद्यात्सर्वेतुल्यफलाःस्मृताः।एकैकस्मैप्रदातव्यानवज्रयोग्यौयुधिष्ठिरासा

विक्रीता विप्रमुख्याय दद्यात् सप्तमं कुलं ।। न गोः सुतुल्यं धनमस्ति किंचि द्दुह्यंति वाह्यंति हरंति पापं । तृणं चरंत्यमृतं स्रवंति

विप्रेषु दत्ता कुलमुद्धरंति । एककालं द्विकालं वा यो दद्यात्तिग्मवाजिकं । पंचचामरसंयुक्ते विमाने सोपि गच्छति ।। गजं दंते तु

रौप्यं च कर्णे गां चैव पुच्छे महिषीं च पृष्ठे ।। अजाविके तु स्तनेनाभिमध्ये ...खुरे संयुतमग्रभागे । दद्यादिति शेषः । संयुतहेषस

हितहलं तदग्रभागे गृहीत्वा दद्यादित्यर्थः ।। इति गोसावित्री । यत्र सा धनमूलं योनिर्विश्वस्याघप्रणाशनः । विश्वरूपधरो दे

वः प्रीयतामनया गवा ।। १ ।। जलशायी ब्रह्मपिता पद्मनाभः सनातनः । अनंतभोगशयनः प्रीयतां परमः पिता ।। २ ।। गोमती

विद्याधारते या गावो मामुपतिष्ठंतु हेमशृंग्यः पयोमुचः । सुरभ्यः सौरभेयाश्च सरितः सागरास्तथा ।। गावः पश्याम्यहं गावः

नित्यं गावः पश्यंतु मां सदा ।। ४ ।। गावोऽस्माकं वयं तासां यतो गावस्ततो वयं । यमोपि । गावः सुरभयो नित्यं गावः स्वस्त्यय

नं महत् ।। ५ ।। अन्नमेव परं गावो देवानां हविरुत्तमं । पावनं सर्वभूतानां रक्षंति च वहंति च ।। हविषा मंत्रपूतेन तर्पयंत्य

मरान् दिवि ।। ६ ।। ऋषीणामपि अग्निहोत्रे गावो होमे प्रतिष्ठिताः । सर्वेषामेव भूतानां गावः शरणमुत्तमं ।। गावः पवित्रं

परमं गावो मंगलमुत्तमं । गावः स्वर्गस्य लोकस्य गावो धन्याः सनातनाः । नमो गोभ्यः श्रीमतीभ्यः सौरभीभ्यो नमो नमः ।

नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।। ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतं । एकत्र मंत्रास्तिष्ठंति हविरन्यत्र ति